# शरीरारोग्यप्रदं दिव्यसूर्यकवचम्

नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे।
त्रयीमयाय त्रिगुणात्मधारिणे विरिंचिनारायणशंकरात्मने।।

## अथ सूर्य पूजनम्

आवाहनम्–

ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।
हिरण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन्।।

ॐ जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम्। तमोऽरिं सर्वपापघ्नं सूर्यमावाहयाम्यहम्।।

ॐ विश्वानि देव सवितर्दुरितानि परासुव यद्भद्रं तन्न आसुव।।

स्थापना–

ॐ भूर्भुवःस्व कलिङ्गदेशोद्भव काश्यपगोत्र रक्तवर्ण भो सूर्य! इहागच्छ इह तिष्ठ सूर्याय नमः श्रीसूर्यमावाह्यामि स्थापयामि।

ध्यानम्–

ॐ पद्मासनः पद्माकरो द्विबाहुः पद्मद्युतिः सप्ततुरङ्गवाहनः।
दिवाकरो लोकगुरुः सविता किरीटी हिरण्मयि प्रसादं देवाः।।

ॐ ग्रहाणामादिरादित्यो लोकरक्षण कारकः। विषमस्थानसम्भूतां पीड़ां हरतु ते रविः।।

सूर्यगायत्री–

ॐ आदित्याय विद्महे प्रभाकराय धीमहि । तन्नो सूर्यः प्रचोदयात्।

## सूर्य द्वादशनाम स्तोत्रम्

आदित्यः प्रथमं नाम द्वितीयं तु दिवाकरः। तृतीयं भास्करः प्रोक्तं चतुर्थं तु प्रभाकरः।।
पञ्चमं तु सहस्रांशु षष्ठं त्रैलोक्यलोचनः। सप्तमं हरिदश्वश्च अष्टमं च विभावसुः।।
नवमं दिनकरः प्रोक्तो दशमं द्वादशात्मकः। एकादशं त्रयोमूर्तिः द्वादशं सूर्य एव च।।

## अथ कवचम्

विनियोगः–

ॐ अस्य श्रीशरीरारोग्यप्रदसूर्यकवचस्य याज्ञवल्क्य ऋषिरनुष्टुप्छन्दः, भगवान् सूर्यो देवता निरस्ताशेष–विघ्नतया शरीरारोग्यप्राप्तये विनियोगः।

ऋष्यादिन्यासः–

ॐ याज्ञवल्क्य ऋषये नमः, शिरसि। ॐ अनुष्टुप्छन्दसे नमः, मुखे। ॐ सूर्यदेवतायै नमः, हृदि।
ॐ ॐ बीजाय नमः, गुह्ये। ॐ रश्मिमते शक्तये नमः, पादयोः। ॐ तत्सवितर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्, नाभौ। ॐ निरस्ताशेषविघ्नतया शरीरारोग्यप्राप्तये विनियोगाय नमः, सर्वाङ्गे।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

**करन्यासः-**

ॐ रश्मिमते अङ्गुष्ठाभ्यां नमः। ॐ समुद्यते तर्जनीभ्यां नमः। ॐ देवासुरनमस्कृताय मध्यमाभ्यां नमः।
ॐ विवस्वते अनामिकाभ्यां नमः। ॐ भास्कराय कनिष्ठिकाभ्यां नमः।
ॐ भुवनेश्वराय करतलकरपृष्ठाभ्यां नमः।

**हृदयादि अङ्गन्यासः-**

ॐ रश्मिमते हृदयाय नमः। ॐ समुद्यते शिरसे स्वाहा। ॐ देवासुरनमस्कृताय शिखायै वष्ट्।
ॐ विवस्वते कवचाय हुम्। ॐ भास्कराय नेत्रत्राय वौषट्। ॐ भुवनेश्वराय अस्त्राय फट्।

**अथ ध्यानम्:-**

ॐ ध्येयः सदा सवितृमण्डलमध्यवर्ती, नारायण सरसिजासनसन्निबिष्टः।
केयूरवान्मकरकुण्डलवान् किरीटी, हारी हिरण्मयवपुर्धृतशंखचक्रः।।

**श्री याज्ञवलक्य उवाच-**

शृणुष्व मुनिशार्दूल सूर्यस्य कवचं शुभम्। शरीरारोग्यदं दिव्यं सर्वसौभाग्यदायकम्।।1।।
देदीप्यमानमुकुटं स्फुरन्मकरकुण्डलम्। ध्यात्वा सहस्त्रकिरणं स्तोत्रमेतदुदीर्यते।।2।।
शिरो मे भास्करः पातु ललाटं मेऽमितद्युतिः। नेत्रो दिनमणिः पातु श्रवणे वासरेश्वरः।।3।।
घ्राणं धर्म घृणिः पातु वदनं वेदवाहनः। जिह्वा मे मानदः पातु कण्ठं मे सुरवंदितः।।4।।
स्कन्धौ प्रभाकरः पातु वक्षः पातु जनप्रियः। पातु पादौ द्वादशात्मा सर्वाङ्गं सकलेश्वरः।5।।
सूर्यरक्षात्मकं स्तोत्रं लिखित्वा भूर्जपत्रके। दधाति यः करे तस्य वश्याः सर्वसिद्धयः।।6।।
सुस्नातो यो जपेत्सम्यग्योऽधीते स्वस्थमानसः। स रोगमुक्तो दीघार्युः सुखं पुष्टिं च विन्दति।।7।।

।।इति श्रीयाज्ञवल्क्यविरचितं शरीरारोग्यप्रदं दिव्यसूर्चकवचम् सम्पूर्णम्।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM